**Selected Yoga-Sutras of Patañjali**

1. अथ योगानुशासनम्

   atha yoga-anuśāsanam. (I.1)

2. योगश्चित्तवृत्तिनिरोधः

   yogaś citta-vṛtti-nirodhaḥ. (I.2)

3. तदा द्रष्टुः स्वरूपेऽवस्थानम्

   tadā draṣṭuḥ svarūpe ’vasthānam. (I.3)

4. वृत्तिसारूप्यमितरत्र

   vṛtti-sārūpyam itaratra. (I.4)

5. अभ्यासवैराग्याभ्यां तन्निरोधः

   abhyāsa-vairāgyābhyāṃ tan-nirodhaḥ. (I.12)

6. ईश्वरप्रणिधानाद्वा

   īśvara-praṇidhānād vā. (I.23)

Source: http://www.shrikrishna.de/download/yoga_sutras_patanjali_devanagari.pdf

7. तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः

tapaḥ-svādhyāya-īśvarapraṇidhānāni kriyā-yogaḥ. (II.1)

8. अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः

avidyā-asmitā-rāga-dveṣa-abhiniveśāḥ kleśāḥ. (II.3)

9. हेयं दुःखमनागतम्

heyam duḥkham anāgatam. (II.16)

10. विवेकख्यातिरविप्लवा हानोपायः

viveka-khyātir aviplavā hāna-upāyaḥ. (II.26)

11. योगाङ्गानुष्ठानादशुद्धिक्षये
ज्ञानदीप्तिराविवेकख्यातेः

yoga-aṅga-anuṣṭhānād aśuddhi-kṣaye
jñāna-dīptir ā viveka-khyāteḥ. (II.28)

12. यमनियमासनप्राणायामप्रत्याहार
धारणाध्यानसमाधयोऽष्टावङ्गानि

yama-niyama-āsana-prāṇāyāma-pratyāhāra
dhāraṇā-dhyāna-samādhayo 'ṣṭāv aṅgāni. (II.29)

Source: http://www.shrikrishna.de/download/yoga_sutras_patanjali_devanagari.pdf